# द्वितीया विभक्तिः - प्रथमभागः

## एतानि चित्राणि दृष्ट्वा वाक्यानि पठत –

| | | |
|---|---|---|
|  |  |  |
| बालकः | विद्यालयः | बालकः **विद्यालयं** गच्छति \| |

| | |
|---|---|
| | |

| | |
|---|---|
|  |  |
| बालिका **क्रीडालयं** गच्छति । | बालकः **पाठं** पठति। |

**अधोलिखितानां शब्दानाम् उचितविभक्तिरूपेण रिक्तस्थानानि पूरयतु ---**

| | | | |
|---|---|---|---|
| १. आपणः | २. ग्रन्थालयः | ३. वित्तकोषः | ४. प्रकोष्ठः |
| ५. मठः | ६. बौद्धविहारः | ७. आश्रमः | ८. चन्द्रलोकः |
| ९. विदेशः | १०. हिमालयः | ११. देवालयः | १२. भूलोकः |

1. ग्राहकः **आपणं** गच्छति।
2. प्राध्यापकः ----- गच्छति।
3. धनिकः ----- गच्छति।
4. माता ----- गच्छति।
5. भक्तः ----- गच्छति।
6. भिक्षुकः ----- गच्छति।
7. आचार्यः ----- गच्छति।
8. अन्तरिक्षयात्रिकः ----- गच्छति।

9. भ्राता ----- गच्छति।
10. साधकः ----- गच्छति।
11. पिता ----- गच्छति।
12. नारदः ----- गच्छति।

# एतत् सम्भाषणम् उच्चैः पठत अवगच्छत च –

↵माता – गोविन्द ! भवान् किं करोति ?

गोविन्दः – पाठं पठामि अम्ब !

माता – वत्स ! आपणं गत्वा आगच्छति वा ?

गोविन्दः – अम्ब ! शीघ्रं लिखित्वा गच्छामि | किम् आनयामि ततः ?

माता – वत्स ! आपणं गत्वा लवणं, शर्करां, तण्डुलं, गुडं, द्विदलं च आनय |

गोविन्दः – भगिनीं वदतु अम्ब ! सा किं करोति ?

माता – सा अवकरं क्षिप्त्वा पात्रं प्रक्षालयति | द्रोण्यां जलं पूरयति | भूमिं वस्त्रेण मार्जयति | पुष्पाणि आनीय मालां करोति | एवं तस्याः बहूनि कार्याणि सन्ति भोः |

गोविन्दः – ममापि पठनं बहु अस्ति |

माता – दशनिमेषाभ्यन्तरे आपणं गत्वा आगच्छतु | अनन्तरं पाठान् पठ |

गोविन्दः – तर्हि शीघ्रं धनं स्यूतं च ददातु अम्ब !

माता – आगमनसमये द्वौ कूर्चौ, अग्निपेटिके, सम्मार्जन्यौ च आनय |

गोविन्दः – द्वौ स्यूतौ ददातु, धनम् अधिकं ददातु, चाकलेहान् अपि आनयामि.....?

माता – अतः एव भवान् शीघ्रं गन्तुम् उद्युक्तः | स्वीकुरु ....|

**=== अजन्तशब्दानां द्वितीयाविभक्तिप्रयोगः ===**

| | | | |
|---|---|---|---|
| प्रथमाविभक्तिः | अकारान्तः पुंलिङ्गः | मयूरः | मयूराः |
| द्वितीयाविभक्तिः | | मयूरम् | मयूरान् |
| प्रथमाविभक्तिः | आकारान्तः स्त्रीलिङ्गः | बालिका | बालिकाः |
| द्वितीयाविभक्तिः | | बालिकाम् | बालिकाः |
| प्रथमाविभक्तिः | ईकारान्तः स्त्रीलिङ्गः | नदी | नद्यः |
| द्वितीयाविभक्तिः | | नदीम् | नदीः |
| प्रथमाविभक्तिः | अकारान्तः नपुंसकलिङ्गः | पुस्तकम् | पुस्तकानि |
| द्वितीयाविभक्तिः | | पुस्तकम् | पुस्तकानि |

| **=== सर्वनामशब्दानां द्वितीयाविभक्तिप्रयोगः ===** | | |
|---|---|---|
| प्रथमाविभक्तिः | सः | ते |
| द्वितीयाविभक्तिः | तम् | तान् |
| | | |
| प्रथमाविभक्तिः | सा | ताः |
| द्वितीयाविभक्तिः | ताम् | ताः |
| | | |
| प्रथमाविभक्तिः | एषः | एते |
| द्वितीयाविभक्तिः | एतम् | एतान् |
| | | |
| प्रथमाविभक्तिः | एषा | एताः |
| द्वितीयाविभक्तिः | एताम् | एताः |
| | | |
| प्रथमाविभक्तिः | अहम् | वयम् |
| द्वितीयाविभक्तिः | माम् | अस्मान् |

| | | |
|---|---|---|
| प्रथमाविभक्तिः | भवान् | भवन्तः |
| द्वितीयाविभक्तिः | भवन्तम् | भवतः |
| | | |
| प्रथमाविभक्तिः | भवती | भवत्यः |
| द्वितीयाविभक्तिः | भवतीम् | भवतीः |
| | | |
| प्रथमाविभक्तिः | तत् | तानि |
| द्वितीयाविभक्तिः | तत् | तानि |
| | | |
| प्रथमाविभक्तिः | एतत् | एतानि |
| द्वितीयाविभक्तिः | एतत् | एतानि |
| | | |
| प्रथमाविभक्तिः | कः | के |
| द्वितीयाविभक्तिः | कम् | कान् |
| | | |
| प्रथमाविभक्तिः | का | काः |
| द्वितीयाविभक्तिः | काम् | काः |
| | | |
| प्रथमाविभक्तिः | किम् | कानि |
| द्वितीयाविभक्तिः | किम् | कानि |
| | | |
| प्रथमाविभक्तिः | सर्वः | सर्वे |
| द्वितीयाविभक्तिः | सर्वम् | सर्वान् |
| | | |
| प्रथमाविभक्तिः | सर्वा | सर्वाः |
| द्वितीयाविभक्तिः | सर्वाम् | सर्वाः |

| | | |
|---|---|---|
| | | |
| प्रथमाविभक्तिः | सर्वम् | सर्वाणि |
| द्वितीयाविभक्तिः | सर्वम् | सर्वाणि |

**आवरणे लिखितानां शब्दानां द्वितियाविभक्तिरूपाणि लिखन्तु ---**

1. सः (अहम् ) ----- आह्वयति।
2. सा (भवती) ----- पश्यति ।
3. जनानी (सा) ----- पृच्छति ।
4. त्वं (ते [पुं]) ----- वदसि ।
5. सैनिकाः (देशः) ----- रक्षन्ति ।
6. सा (भवत्यः ) ----- स्मरति ।
7. सर्वे (अहम्) ----- पृच्छन्ति ।
8. भवान् (एषा) ----- जानाति किम् ?
9. सः ( भवान्) ----- न जानाति।

# उदाहरणानुसारं प्रश्न-निर्माणं कुर्वन्तु।

| **वाक्यम्** | **प्रश्नः** |
|---|---|
| सः सत्यं वदति। | कः सत्यं वदति? |
| एषः संयमं करोति। | ------? |
| योगी विभूतिं प्राप्नोति। | ------? |
| अहिंसकः वैरं त्यजति। | ------? |

| | |
|---|---|
| साधकः इन्द्रियाणि निगृह्णाति । | ------? |
| छात्रः पादान् प्रसारयति। | ------? |
| सा हठयोगप्रदीपिकां पठति। | ------? |
| वैद्यः नाडीः परिशीलयति। | ------? |
| वैद्यः नाडीः परिशीलयति। | ------? |
| सः नियमान् पालयति। | ------? |
| अहं षट्कर्माणि करोमि। | ------? |

↵=== **अधोलिखितं सम्भाषणं पठतु । आवरणे विद्यामानानां शब्दानाम् उचितरूपाणि रिक्तस्थाने लिखतु** ↵--- ===

↵माता - पुत्र ! (श्लोकः) ----- वदतु।

पुत्रः - अहं (श्लोकः) ----- वक्तुं न शक्नोमि।

माता – किमर्थम् ?

पुत्रः – अहं (शाला) ----- न गतवान् ।

माता – अहं (भवान्)---- पाठयामि।

पुत्रः – सत्यं, भवती (अहं) ----- पाठयतु।

माता – आं, पाठयामि।

पुत्री – अम्ब, (अहम्) ----- अपि पाठयतु।

माता – अस्तु, (भवती) ----- अपि पाठयामि।

पुत्रः – कदा पाठयति?

माता – इदानीं (भवान्) ----- पाठायामि ।

पुत्रः – (अनुजा) ----- कदा पाठयति।

माता – (सा) ----- श्वः पाठयामि ।

**अधः एकं सम्भाषणम् अस्ति । सम्भाषणं पठत । आवरणे विद्यमानानां शब्दानाम् उचितानि रूपाणि रिक्ते स्थले लिखत ।**

↵गीता – ह्यः भवती किमर्थं _____________ (विद्यालयः) न आगतवती ?

माला – ह्यः अहं ____________ (ग्रामः) गतवती आसम् |

गीता – __________ (ग्रामः) किमर्थं गतवती भवती ?

माला – प्रतिवर्षं मम पितामहः ___________ (देवपुजा) करोति | अतः अहं _________ (ग्रामः) गतवती |

गीता – ग्रामे भवती किं किं कृतवती ?

माला – अहं ग्रामे __________ (लीला) ____________ (लता) च दृष्टवती | अहम् अपि __________ (पूजा) कृतवती | पितामहेन सह ____________ (संभाषणं) कृतवती | _____________ (बीजपूरवृक्षः) आरुह्य ___________ (फलानि) खादितवती | अस्तु , ह्यः अध्यापकः ___________ (कः) ____________ (पाठः) पाठितवान् ?

गीता – ह्यः अध्यापकः __________ (पाठः) न पठितवान् | अपि तु __________ (श्लोकाः) पठितवान् |

माला – तृतीयपाठस्य विषये सः ____________ (प्रश्नाः) पृष्टवान् वा ?

गीता – आं , सः ____________ (प्रश्नाः) पृष्टवान् | वयम् __________ (उत्तराणि) उक्तवन्तः |

माला – ह्यः गायत्री ____________ (कक्ष्या) आगतवती ?

गीता – आम् | सा _________ (नूतनः) __________ (चोलः) ___________ (निचोलः) च धृत्वा आगतवती | ह्यः तस्याः जन्मदिनम् | सा ____________ (अध्यापिकाः) नमस्कृतवती | अध्यापकाः ___________ (आशीर्वादः) कृतवन्तः | वयम् ___________________ (अभिनन्दनवचनानि) उक्तवन्तः |

# योगाभ्यासे द्वितीयाविभक्तीनाम् उदाहरणानि –

1. युवकः प्राणायामं करोति |
2. योगी इन्द्रियं निगृह्णाति |
3. साधकः सत्यं वदति |
4. भक्तः मोक्षम् इच्छति |
5. शिष्यः योगम् अभ्यस्यति |
6. शवासनं श्रान्तिं हरति |
7. योगः रोगं नाशयति |
8. सः वायुं पूरयति |

**अभ्यासः - एकवचने बहुवचने च द्वितीयाविभक्तिप्रयोगः**

एतानि वाक्यानि पठन्तु –

| वाक्यम् | प्रश्नः |
|---|---|
| भक्तः ध्यानं करोति | | भक्तः किं करोति ? |
| आचार्यः योगाभ्यासम् अवलोकयति। | आचार्यः कम् अवलोकयति ? |
| छात्रः प्राणान् पूरयति। | छात्रः कान् पूरयति ? |
| योगशिक्षकः मुद्रां कारोति। | योगशिक्षकः काम् करोति ? |
| योगः अस्मान् रक्षति। | योगः कान् रक्षति ? |
| त्वं बालिकाभ्यः योगासनं दर्शयति। | त्वं बालिकाभ्यः किं दर्शयति ? |
| सः आसनानि प्रदर्शयति। | सः कानि प्रदर्शयति ? |
| बालकः नेतिसूत्रे नासिकायां स्थापयति। | बालकः के नासिकायां स्थापयति ? |

| | |
|---|---|
| तौ भानुं नमस्कुरुतः। | तौ कं नमस्कुरुतः ? |
| एषा महिला प्राणायामं पाठयति। | एषा के प्राणायामं पाठयति ? |